# E-CONTENT

Prepared by


## MR. ASIM RUIDAS

**Assistant Professor**

**Department of Sanskrit**

## BARJORA COLLEGE

**NAAC ACCREDITED 'B'**
**Affiliated to the Bankura University**
**Barjora, Bankura, West Bengal, Pin-722202**
**Estd. – 1985**


## E-CONTENT FOR

**Semester:** 5th Semester

**Students:** Sanskrit Honours

**Course Code:** AHSNS 504DSE-2

**Course Title:** Kavya- Modern Drama Daridradurdaivam of Srijiva Nyayatirtha

## TOPIC OF THE E-CONTENT

**॥ दरिद्रदुर्दैवम् इति प्रहसने प्रकटितं समाजस्य चित्रम् ॥**

**(Daridradurdaivam iti Prahasane Prakatitam Samajasya Chitram)**

## ॥ दरिद्रदुर्दैवम् इति प्रहसने प्रकटितं समाजस्य चित्रम् ॥

**भूमिका**- श्रीजीवन्यायतीर्थमहोदयेन विरचिते दरिद्रदुर्देवनामके प्रहसने मन्दोदरी, वक्रेश्वरः, लम्बोदरः, षडाननः, क्षुद्ररामः सिद्धः सिद्धा चेति पात्राणि वर्तन्ते। एषु सिद्धौ विहाय अन्यानि पात्राणि न श्लाघ्यानि भवन्ति। वक्रेश्वरः खलस्वभावः, परश्रीकातरः, अहङ्कारी भिक्षुकः। द्विः परिणीतवान् सः । द्वितीया भार्या मन्दोदरी । अकिञ्चनः अपि असौ प्रौढे वयसि द्वितीयं विवाहम् अकरोत्। मन्दोदरी योग्या भार्या वक्रेश्वरस्य । पुत्रौ अपि मातापितरौ अनुकुरुतः । क्षुद्ररामः कृपणः, वञ्चकः च । एतेषां चरित्रसंलापादिभिः समाजस्य यथार्थ चित्रं न लभ्यते । तथापि केचन सामाजिकाः विषयाः अत्र स्फुटतया प्रतिभान्ति।

**परिवारस्य पालनाय भिक्षावृत्तिः**- वक्रेश्वरस्य द्वितीया भार्या मन्दोदरी । कुटीरमात्रं तस्य सहायम्। भिक्षा तस्य वृत्तिः । वयसा अपि प्रौढः । तथापि तस्य द्वितीयः विवाहः । अयं समाजस्य व्याधिविशेषः सूचितः भवति। अयम् एकः सामाजिकः पक्षः अस्मिन् प्रहसने चित्रितः वर्तते । वक्रेश्वरः बहुधा अटित्वा अपि भिक्षां लब्धुं न समर्थः । तेन चतुर्णां परिवारजनानां निरन्नता सम्भवति । इदम् अपि समाजस्य विशिष्टं चित्रम्। दुर्भिक्षशब्दस्य यथार्थतः प्रयोगः अत्र भवितुम् अर्हति । यद्यपि वक्रेश्वरः दुर्मुखः तथापि भिक्षायाः अभावः समाजे न भवेत्। अन्यतः, समाजे आढ्यानां सङ्ख्या न्यूना नास्ति। अथापि एकस्य परिवारस्य पालनाय भिक्षा न लभ्यते इति चिन्तनीयः विषयः।

**सन्तानानां शिक्षाभावः**- लम्बोदरषडाननौ किशोरौ अपि न अध्ययने रतौ इति विशेषः । श्रीजीवन्यायतीर्थमहोदयस्य समये समाजे प्रायः एषा स्थितिः आसीत्। प्राचीनभारते समेषां पात्रतानुगुणा शिक्षा निःशुल्का भोजनावासव्यवस्थासहिता गुरुकुलेषु कल्पिता भवति स्म। सा स्थितिः समाप्ता। अर्वाचीने काले सर्वकारेण शिक्षायाः धुरा गृहीता। किन्तु समेषां शिक्षा यथा

भवेत् तादृशी व्यवस्था न कल्पिता। तेन एव लम्बोदरषडाननी अध्ययनयोग्ये वयसिं पितुः मुखम् अपेक्ष्य आम्रातकपत्राणां चर्वणे ततः च पितुः अनुरोधेन भिक्षाटनाय गतौ।

<u>श्रद्धाहीनता</u>- क्षुद्ररामेण समाजस्य अपरं दृश्यम् उद्घाटितम् । समाजे देवद्विजविषयिणी श्रद्धा वर्तते चेद् अपि सा श्रद्धा न भक्तिप्रीतिप्रसूता, अपि च भयलोभादिप्रसूता इति तस्य वचोभिः ज्ञायते

<u>समाजे भिक्षकाणां संख्यावृद्धिः</u>- यदा क्षुद्ररामम् उपसर्प्य वक्रेश्वरः भिक्षां याचते तदा क्षुद्ररामः कथयति, आः **प्रातरेपि भिक्षुकाणाम् उपद्रवः** इति । तेन इदं व्यज्यते यत् समाजे भिक्षुकाणां सङ्ख्या महती वर्तते इति । इदम् एव पुनः स्पष्टं भवति यदा लम्बोदरषडाननयोः भिक्षापात्रे पूरणस्य सङ्कल्पेन पाशकान् अक्षिपत् चक्रेश्वरः तस्मिन् काले नेपथ्ये बहूनी भिक्षुकाणो कोलाहलः श्रुतः । एतेन भिक्षुकाणी सङ्ख्यावृद्धिः ऊहनीया ।

<u>समाजे अवैशाम्यम्</u>- सिद्धस्य वचनैः काचन विशिष्टा सामाजिकी स्थितिः प्रकटिता नाट्यकारैः। यदापाशकचमत्कारेण सिद्धायाः मुखे श्मश्रूणि अभवन् तदा पुरुषाधिकारं वाञ्छन्तीनां स्त्रीणाम् उपहासं करोति । वस्तुतः समाजे स्त्रीपुरुषयोः विविधविषयेषु वैषम्यं तथावैमत्ये समाजस्य महत्यै हानये अकल्पत वस्तुतः समाजे स्त्रीणां पुरुषाणां च समानःआदरः तथा समाजस्य अभिवृद्धये समानं योगदानम् अपेक्षितम् अस्ति। किन्तु, स्थितिःविपरीता आसीत् । स्त्रीणां विषये अनुचितः अनादरः तथा तासां योगदानस्य उपेक्षासमाजस्य हानिम् असाधयत् । वक्रेश्वरः कथयति-

> भिक्षापि दुर्लभा जाता शिक्षा धर्ममयी गता ।
> सर्वत्र तु तिरस्कारः पुरस्कारोऽर्थिनाम् अहो ॥इति ।

समाजे धर्ममयी शिक्षा नष्टा वर्तते। भिक्षा दुर्लभा भवति । याचकानां सर्वत्रतिरस्कारः एव दृश्यते । किं पुनः अस्माद् अधिक समाजस्य विषये वर्ण्यम् अवशिष्येत?द्वितीयः श्लोकः भरतवाक्यभूतः। तत्र सिद्धः प्रार्थयते-

खलता खलतासमाकुलं

नरचित्तं परिहाय खेलतु।

प्रतिवेशिसुखाभिलाषिता

लसताल्लोकमनस्सु सन्ततम् ॥इति ।

उपसंहारः- मनुष्यस्य चित्तानि खलतासमाकुलानि जातानि । कोऽपि स्वप्रतिवेशिनां कल्याणं न कामयते । प्रतिवेशिनः दुःखेन एवं आत्मानं सुखिनं मन्यते जनः। वस्तुतः सर्वेषां सुखेन एव स्वयं सुखी भवितुं शक्नोति मनुष्यः । अन्येषां दुःखकामेन मनुष्येण स्वसुखाद् अपि दूरं गतम् इति समाजस्य विशिष्टां दुर्दशाम् अत्र असूचयत् नाट्यकृत् । इत्थं कस्यचन अवक्षीणस्य समाजस्य चित्रम् अस्मिन् प्रहसने प्रकटितं नाट्यकृता इति शिवम् ।।